# दर्शन पाठ

दर्शनं देव देवस्य, दर्शनं पापनाशनं।
दर्शनं स्वर्गसोपानं, दर्शनं मोक्षसाधनं॥
दर्शनेन जिनेन्द्राणां, साधूनां वन्दनेन च।
न चिरं तिष्ठते पापं, छिद्रहस्ते यथोदकम्॥
वीतरागमुखं दृष्ट्वा, पद्मराग सम प्रभं।
अनेक जन्मकृतं पापं, दर्शनेन विनश्यति॥
दर्शनं जिन सुर्यस्य, संसार-ध्वान्त-नाशनं।
बोधनं चित्त-पद्मस्य, समस्तार्थ-प्रकाशनं॥
दर्शनं जिन चन्द्रस्य, सद्धर्मामृत-वर्षणं।
जन्म-दाह-विनाशाय, वर्धनं सुख-वारिधेः॥
जीवादि-तत्व प्रतिपादकाय, सम्यक्त्व-मुख्याष्ट-गुणार्णवाय।
प्रशान्त-रूपाय दिगम्बराय, देवाधिदेवाय नमो जिनाय।
चिदानन्दैक-रूपाय, जिनाय परमात्मने।
परमात्म-प्रकाशाय, नित्यं सिद्धात्मने नमः॥
अन्यथा शरणं नास्ति, त्वमेव शरणं मम।
तस्मात्कारुण्य-भावेन, रक्ष-रक्ष जिनेश्वर॥



नहि त्राता नहि त्राता, नहि त्राता जगत्त्रये।
वीतरागात्परो देवो, न भूतो न भविष्यति॥
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने।
सदामेऽस्तु सदामेऽस्तु सदामेऽस्तु भवे-भवे॥
जिनधर्म-विनिर्मुक्तो, मा भवेच्चक्रवर्त्यपि।
स्याच्चेटोऽपि द्ररिद्रोऽपि, जिनधर्मानुवासितः॥
जन्म-जन्मकृतं पापं, जन्म कोटिभिरर्जितं।
जन्म-मृत्यु-जरा-रोगं, हन्यते जिन-दर्शनात्॥



अद्याभवत्सफलता नयन-द्वयस्य्, देव त्वदीय-चरणां-बुज-वीक्षणेन।
अद्य त्रिलोक-तिलक प्रतिभाषते मे, संसार-वारिधिरयं चुलुक प्रमाणम्॥